International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(3): 304-307
© 2024 IJSR
[www.anantaajournal.com](http://www.anantaajournal.com)
Received: 24-02-2024
Accepted: 27-03-2024

**Dr. Vinayak Bhat**
Lecturer in Sanskrit, MES Prof. BR Subbarao PU College Vidyaranyapura, Bangalore, Karnataka, India

**Corresponding Author:**
**Dr. Vinayak Bhat**
Lecturer in Sanskrit, MES Prof. BR Subbarao PU College Vidyaranyapura, Bangalore, Karnataka, India

# भासनाटकेषु क्षात्रधर्मः

**Dr. Vinayak Bhat**

**DOI:** [https://doi.org/10.22271/23947519.2024.v10.i3e.2406](https://doi.org/10.22271/23947519.2024.v10.i3e.2406)

**सारांश**

अपारेऽस्मिन् संस्कृतकाव्यप्रपञ्चे नाटकानि सहृदयहृदयाकाशे रसोत्पत्तिं जनयन्तः लोकनीतिं राजनीतिं च बोधयन्ति कान्तासम्मिततया । तत्रापि भासः संस्कृतनाटकक्षेत्रे स्वीयप्रतिभादर्शनेन मान्यतां प्राप्नोति । स च भासः विविधशास्त्रेषु विद्यमानं स्वीयं शास्त्रार्थज्ञानं स्वग्रन्थेषु योजयति । तथैव धर्मशास्त्रे तस्य असाधारणं ज्ञानमासीदिति ग्रन्थानामवलोकनेन अवगम्यते । शोधपत्रेऽस्मिन् भासनाटकेषु विद्यमानाः क्षात्रधर्मविचाराः सङ्गृह्य निरूपिताः वर्तन्ते ।

**कूटशब्दाः** भासः, क्षात्रधर्मः, राजधर्मः, युद्धनीतिः, दण्डनम्

## प्रस्तावना

**नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्** इत्युक्तिः सर्वविदितमेव । नाट्यं द्रष्टुं रसिकाः शास्त्रज्ञाः सामाजिकाः नानाबुद्धयः समागच्छन्ति । तत्र धार्मिका अपि भवन्ति लोके । सर्वेऽपि स्व स्व चिन्तननये नाटकं पश्यन्ति । स्वाभीष्टं सानन्देन गृण्हन्ति । तस्मात् कवयः नाटकेषु शास्त्राणां नीतिसारमपि योजितवन्तः । तत्र वर्णाश्रमधर्मं अपि अन्यतमः। भासनाटकेषु दृश्यमानान् क्षात्रधर्मविचारन् सङ्कलय्य अत्र किञ्चिन्निरूप्यते ।

## उपक्रमः

भारतीयधर्मपरम्परायाः वणव्यवस्थायां द्वितीयप्रकाररूपण तिष्ठति क्षत्रियवर्णः । तर्हिः क्षत्रियाणां धर्मः कः ? तषां कर्तव्यं किमिति विचारे उच्यते स्मृतिषु-सर्वे योगाः राजधर्मेषु युक्ताः सर्वे धर्माः राजधर्मेषु दृष्टाः।

सर्वाः विद्याः राजधर्मे प्रयुक्ताः सर्वाः दीक्षाः राजधर्मेषु चोक्ताः॥
सर्वे भोगाः राजधर्मेषु भुक्ताः सर्वे लोकाः राजधर्मे प्रविष्टाः।

तेजः सत्यं धृतिर्दाक्ष्यं सङ्ग्रामेष्वनिवर्तिता ।
दानमीश्वरभावश्च क्षात्रधर्मः प्रकीर्तितः ॥[1]

**प्रतिमानाटके भासकविना एवमुच्यते** –

चतुर्णां वर्णानामभयमिव दातुं व्यवसितः [2] ॥

वचनमिदं वचनं चतुर्णां वर्णानां रक्षणार्थमेव क्षात्रधर्मः वर्तते इति अंशं स्मारयति । तथैव महाभारतस्य शान्तिपर्वणि एवमुक्तम् –

सर्वे धर्मा राजधर्मप्रधानाः सर्वे वर्णाः पाल्यमाना भवन्ति ।
सर्वत्यागो राजधर्मेषु राजन्त्यागं धर्मं प्राहुरयं पुराणम् ॥[3]
आत्मत्यागः सर्वभूतानुकम्पा लोकज्ञानं पालनं मोक्षणं च ।
विषण्णानां मोक्षणं पीडितानां क्षात्रे धर्मे विद्यते पार्थिवानाम् ॥[4]

**क्षात्रगुणा**

रावणः अभिषेकनाटके सीतापहरणसमये वदति-

क्षात्रधर्मे यदि स्निग्धः कुर्याद्रामः पराक्रमम् ।

पूर्वोक्तविचारः अत्र सङ्गच्छते । क्षत्रियः रामः सीतां मोचयितुं क्षात्रधर्मं कथं परिपालयति ? इति विचारः रावणस्य वचनेन ज्ञायते । अविमारकम् इति नाटके कुरङ्ग्याः पिता राजा कुन्तिभोजः राजधर्मविषये इदमुवाद-

धर्मः प्रागेव चिन्त्यः सचिवमतिगतिः प्रेक्षितव्या स्वबुद्या
प्रच्छाद्यौ रागरोषौ मृदुपरुषगुणं कालयोगेन कार्यो ।
ज्ञेयं लोकानुवृत्तं परचरनयनैर्मण्डलं प्रेक्षितव्यं
रक्ष्योरत्नादिहात्मा रणशिरसि पुनः सोऽपि नावेक्षितव्यः ॥[5]
इति

गोपहीना यथा गावः विलयं यान्त्यपालिताः ।
एवं नृपतिहीना हि विलयं यान्ति वै प्रजाः ॥[6]

राज्ञा विना प्रजाः गोपहीनाः गावः इव नाशं यन्ति अतः धर्मं परिपालयता राज्ञा प्रजाः रक्षणीयाः इति राजधर्मविचारं भासोऽत्र प्रकटीचकार । तदेवोक्तं स्मृतिग्रन्थेषु -

लोकानां तु विवृद्यर्थं मुखबाहूरुपादतः।
ब्राह्मणं क्षत्रियं वैश्यं शूद्रं च निरवर्तयत् ॥[7]
यावानवध्यस्य वधे तावान्वध्यस्य मोक्षणे।
अधर्मो नृपतेर्दृष्टो धर्मस्तु विनियच्छतः ॥[8]

ज्येष्ठानां विप्राणां च विषये राजा विनयी भवेत् । तदनुसारेण कर्णभारे निरूपितम् -

राजेन्द्रमौलिमणिरञ्जितपादपद्मः ।
विप्रेन्द्रपादरजसा तु पवित्रमौलिः
कर्णो भवन्तमहमेष नमस्करोमि ॥[9]

विप्रेन्द्रपादरजसा पवित्रमौलिः कर्णः नमस्करोति इति वचनेन राजा ब्राह्मणेषु दत्तादरः भवेत् इति शास्त्रकारवचनं भासेन प्रदर्शितम् । तद्विषये यज्ञवल्क्यः
व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैः सह।
धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः॥[10]

अविमारकः विदूषकं वदति

एकः परगृहं गच्छेत् द्वितीयेन तु मन्त्रयेत् ।
बहुभिः समरं कुर्यात् इत्ययं शास्त्रनिर्णयः ॥[11]

---

[1] विष्णुस्मृतिः
[2] प्रतिमानाटकम् /४.७
[3] महाभारतम् /शान्तिपर्वः / ६३.२७
[4] महाभारतम् /शान्तिपर्वः / ६४.२७
[5] अविमारकम् / १.१२
[6] प्रतिमानाटकम् / ३.२३
[7] मनुस्मृतिः / १.३७
[8] मनुस्मृतिः / ९.२४९
[9] कर्णभारम् /१.१६
[10] याज्ञवल्क्यस्मृतिः /२.१
[11] अविमारकम् /२.१०

तथैवाभिषेकनाटके रावणः "हन्यतामयं वानरः" इति हनूमन्तं हन्तुमिच्छति । तदा विभीषणः "सर्वापराधेष्ववध्याः खलु दूताः[12] "इति धर्मवाचं स्मारयति । तदा रावणोऽपि "दूतवधः खलु वचनीयः[13]" इति वदन् क्षात्रधर्ममनुस्मरति । मध्यममव्यायोगे प्रथमेङ्के क्षात्रधर्मनिरूपयन् भासः पाण्डवानां विषये वदति –

युद्धाप्रियाश्च शरणागतवत्सलाश्च दीनेषु पक्षपतिताः कृतसाहसाश्च ।
एवं विधप्रतिभयाकृतिचेष्टितानां दण्डं यथार्हमिह धारयितुं समर्थाः ॥[14]

**युद्धनीतिः दण्डनञ्च**

अभिषेकनाटकस्य प्रथमाङ्के वालिनः वधसमये राममेवं ब्रूते वाली-

नरपतिधर्ममास्थितेन युद्धे मां छलयितुमक्रमेण राम।
वीरेण व्यपगतधर्मसंशयेन लोकानां छलमपनेतुमुद्यतेन॥[15]
छलेन मां प्रहरता प्ररूढमयशः कृतम् ॥[16]

**"युद्धव्यग्रस्याधर्म्यः खलु प्रच्छन्नो वधः"** । इति धर्मविषयं स्मारयन्तं वालिनं रामः धर्ममार्गविषये एवं बोधयन् धर्मं स्मारयति।

वागुराच्छन्नमाश्रित्य मृगाणामिष्यते वधः।
वध्यत्त्वाच्च मृगत्वाच्च भवान्छन्नेन दण्डितः ॥ [17]
भवता वानरेन्द्रेण धर्माधर्मौ विजानता ।
आत्मानं मृगमुद्दिश्य भ्रातृदाराभिमर्शनम् ॥[18]

[12] अभिषेकनाटकम् / ३.१५-१६

[13] अभिषेकनाटकम् / ३.२१-२२

[14] मध्यमव्यायोगः /१.११

[15] अभिषेकनाटकम् /१.१६

[16] अभिषेकनाटकम् /१.१७

[17] अभिषेकनाटकम् /१.१९

[18] अभिषेकनाटकम् /१.२०

धर्मपरिपालकेण रामेण कृतं वालिनः दण्डनं शास्त्रविहितमेव । तदेवोक्तं च मनुस्मृतौ -

अनुबन्धं परिज्ञाय देशकालौ च तत्त्वतः
सारापराधौ चालोक्य दण्डं दण्ड्येषु पातयेत् ॥
अधर्मदण्डनं लोके यशोघ्नं कीर्तिनाशनम् ।
अस्वर्ग्यं च परत्रापि तस्मात्तत्परिवर्जयेत् ॥[19]
परचक्रैर्नाक्रान्ता धर्मसङ्करवर्जिता।
भूमिर्भर्तारमापन्नं रक्षिता परिरक्षति ॥[20]

**राज्ञः गुणाः**

यौगन्धरायणः क्षात्रधर्मविषये एवं वदति -

भारतानां कुले जातो विनीतो ज्ञानवाञ्छुचिः।
तन्नार्हसि बलाद्धर्तुं राजधर्मस्य देशिकः ॥[21]
कातरा येऽप्यशक्ता वा नोत्साहस्तेषु जायते।
प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेव भज्यते ॥[22]
कर्णभारस्य भरतवाक्ये एवमस्ति ।
सर्वत्र सम्पदः सन्तु नश्यन्तु विपदः सदा ।
राजा राजगुणोपेतो भूमिमेकः प्रशास्तु नः ॥[23]

अत्र राजा राजगुणोपेतो इत्यनेन राजधर्मनिष्ठः भूत्वा भूमिं प्रशासतु इत्याशयः । तत्रैव कर्णभारे -

धर्मो हि यत्नैः पुरुषेण साध्यो भुजङ्गजिह्वाचपलानृपश्रियः।
तस्मात् प्रजापालनमात्रबुद्ध्या हतेषु देहेषु गुणाः धरन्ते ॥[24]

नृपाणां सम्पत्तिः क्षणिकः तस्मात् धर्मः साध्यः । प्रजापालनबुध्या जीवितकाले धर्माचरणं क्रियते चेत् देहान्तेऽपि तस्य गुणाः तथैव तिष्ठन्ति इत्याशयः ।

[19] मनुस्मृतिः / ८.१२६-१२७

[20] प्रतिज्ञायौगन्धरायणम् /१.९

[21] स्वप्नवासवदत्तम् / ६.१६

[22] स्वप्नवासवदत्तम् / ६.०७

[23] कर्णभारम् / १.२५

[24] कर्णभारम् /१.१७

**उपसंहारः**

एवं नाटकेषु क्षत्रधर्मः सम्यग्निरूपितः । नाटकानां द्वारा समाजे विद्यमानानेव अंशान् स्वीकृत्य जागणं समाजपरिवर्तनयत्नश्च दृश्यते । राज्ञां कर्तव्यस्मारणमपि कविभिः कृतम् । तस्मात् भासनाटकेषु निरूपितः क्षात्रधर्मः अधुनातनकालेऽपि महत्वं भजते इति शम् ।

**आधारग्रन्थावलिः**


1. अभिषेकनाटकम् । सं- डा.इ.एम् राजन् । गुरुवायूरुपरिसरः, केरलम् ।
2. अविमारकम् । सं- डा.इ.एम् राजन् । गुरुवायूरुपरिसरः, केरलम् ।
3. कर्णभारम् । सं- डा.इ.एम् राजन् । गुरुवायूरुपरिसरः, केरलम् ।
4. प्रतिज्ञायौगन्धरायणम् । सं-टि.गणपति शास्त्री । श्रीधर प्रिन्टिंग हौस्, त्रिवेन्द्रम् ।
5. प्रतिमानाटकम् । सं-त्रिपाठी & शास्त्री । हंसाप्रकाशनम् । जयपुरम् ।
6. मध्यमव्यायोगः । सं-त्रिलोकीनाथद्विवेदी । भारतीयविद्याभवनम्, दिल्ली ।
7. मनुस्मृतिः । सं-शेषनवरत्नः । समाजपुस्तकालयः, धारवाड।
8. महाभारतम् । (कन्नड) भारतदर्शनप्रकाशनम्, बेङ्गलूरु ।
9. याज्ञवल्क्यस्मृतिः । सं- अ.नागेशः । समाजपुस्तकालयः, धारवाड ।
10. स्वप्नवासवदत्तम् । सं-प्रो.जगदीशप्रसादपाण्डेयः । भारतीयविद्याभवनम्, दिल्ली ।